जिह्वलो। रिपुजिन्नाम स ख्यातो न तस्यासीत् सुतः किल ॥ स समाराध्य तपसा भास्करं तेजसां निधिम्। अवाप कन्यां सुरतिं तां प्रगृह्य गृहं ययौ ॥ तस्यां पितृगृहे ब्रह्मन्! वसत्याश्च पिता मृतः। सापि दुःखपरीताङ्गी स्वां तनुं त्यक्तुमुद्यता ॥ ततस्तां वारयामासुर्ऋषयः सप्त मानसाः। तस्यामासक्तचित्तास्तु सर्व्व एव तपोधनाः॥ अपारयन्ती तद्दुःखं प्रज्वाल्याग्निं विवेश ह। ते चापश्यन्त ऋषयस्तच्चित्ता भावितास्तथा ॥ तां मृतां ऋषयो दृष्ट्वा कष्टं कष्टेति वादिनः। प्रजग्मुर्ज्वलनाच्चापि सप्ताजायन्त दारकाः ॥ ते च माता विना भूता रुरुदुस्तान् पितामहः। निवारयित्वा कृतवान् लोकनाथो मरुद्गणान् ॥ रैवतस्यान्तरे जाता मरुतोऽमी तपोधन!। शृणुष्व कीर्त्तयिष्यामि चाक्षुषस्यान्तरे मनोः ॥ आसीन्मङ्कीति विख्यातो तपस्वी सत्यवाक् शुचिः। सप्तसारस्वते तीर्थे सोऽतप्यत महत्तपः ॥ विघ्नार्थं तस्य तपसो देवाः सम्प्रैषयन् बधूम्। सा चाभ्येत्य नदीतीरं क्षोभयामास भाविनी ॥ ततोऽस्य प्राच्यवच्छुक्रं सप्तसारस्वते जले। तां चैवाभ्यशपन्मूढां मुनिर्म्माङ्कनिको बधूम् ॥ गच्छालज्जेऽतिमूढे! त्वं पापस्यास्य फलं महत्। विध्वंसयिष्यति हयो भवतीं यज्ञसंसदि ॥ एवं शप्त्वा ऋषिः श्रीमान् जगामाथ स्वमाश्रमम्। सरस्वतीभ्यः सप्तभ्यः सप्त वै मरुतोऽभवन्। एते तवोक्ता मरुतः पुरा यथा जाता वियद्व्याप्तिकरा महर्षे!। येषां श्रुते जन्मनि पापहानिर्भवेच्च धर्म्माभ्युदयो महान्वै" ॥ अतःपरं प्रवक्ष्यामि मरुतोऽग्नीन् पितॄन् ग्रहान्। आवहो निवहश्चैव उद्वहः संवहस्तथा ॥ विवहः प्रवहश्चैव परिवाहस्तथैव च। अन्तरीक्षे च वाह्येत्र ते पृथङ्मार्गविचारिणः ॥ महेन्द्रप्रविभक्ताङ्गा मरुतः सप्त कीर्त्तिताः। सूर्य्याग्निश्च शुचिर्नामा वैद्युतः पावकः स्मृतः ॥ निर्मथ्य पचमानोऽग्निस्त्रयः प्रोक्ता इमेऽग्नयः। अग्नीनां पुत्त्रपौत्त्राश्च चत्वारिंशन्नवैव तु। मरुतामपि सर्वेषां विज्ञेयाः सप्त सप्तका इति" ॥ तेषां नामान्युक्तानि वह्निपुराणे यथा

"एकज्योतिश्च द्विज्योतिस्त्रिज्योतिर्ज्योतिरेव च। एकशक्रो द्विशक्रश्च त्रिशक्रश्च महाबलः ॥ इन्द्रश्च गत्यदृश्यश्च ततः पतिसकृत्परः। मितश्च सम्मितश्चैव सुमितश्च महाबलः ॥ ऋतजित् सत्यजिच्चैव सुषेणः सेनजित्तथा। अन्तिमित्रोऽनमित्रश्च पुरुमित्रोऽपराजितः ॥ ऋतश्च ऋतवाहश्च धर्त्ता च वरुणो ध्रुवः। विधारणो नाम तथा देवदेवो महाबलः ॥ ईदृक्षसायदृक्षश्च एते दशमिताशिनः। प्रतिनः प्रसदृक्षश्च सभरश्च महायशाः ॥ धाता दुर्गो धृतिर्भीमस्त्वभियुक्तस्त्वपात् सहः। द्युतिर्वपुरनाध्योऽथ वासः कामो जयो विराट् ॥ इत्येकोनाश्च पञ्चाशन्मरुतः पूर्वसम्भवाः इति" ॥ एवञ्च अनिलस्य जनपञ्चाशद्भेदवत्त्वेन सप्तभेदवत्त्वेन च गणदेवतात्वम् अयञ्चानिलाधिष्ठाता दिक्पालभेदः तस्य च गन्धवतीनामिका पुरी मेरोः शृङ्गे वरुणकुवेरपुरयोर्मध्येऽस्ति। तस्य पूर्व्वादिदिग्भेदेन वहनभेदेन च शुभाशुभसूचकत्वमुक्तं "पूर्व्वः पूर्वसमुद्रवीचिशिखरप्रस्फालनाघूर्णितश्चन्द्रार्कांशुसटाभिघातकलितो वायुर्यदाकाशतः। नैकान्तस्थितनीलमेघपटलां शारद्यसंवर्धितां वासन्तोत्कटसस्यमण्डिततलां विद्यात्तदा मेदिनीम् ॥ यदाग्नेयो वायुर्मलयशिखरास्फालनपटुः प्लवत्यस्मिन्योगे भगवति पतङ्गे प्रवसति। तदा नित्योद्दीप्ता ज्वलनशिखरालिङ्गिततला स्वगात्रोष्मोच्छ्वासैर्वमति वसुधा भस्मनिकरम् ॥ तालीपत्रलतावितानतरुभिः शाखामृगान्नर्तयन् योगेऽस्मिन् प्लवति ध्वनन् सुपरुषो वायुर्यदा दाक्षिणः। सर्वोद्योगसमुन्नताश्च गजवत्तालाङ्कुशैर्घट्टिताः कीनाशा इव मन्दवारिकणिकान्मुञ्चन्ति मेघास्तदा ॥ सूक्ष्मैलालवलीलवङ्गनिचयान् व्याघूर्णयन् सागरे भानोरस्तमये प्लवत्यविरतो वायुर्यदा नैरृतः। क्षुत्तृष्णामृतमानुषास्थिशकलप्रस्तारभारच्छदा मत्ता प्रेतवधूरिवोग्रचपला भूमिस्तदा लक्ष्यते ॥ यदा रेणूत्पातैः प्रविकटसटाटोपचपलः प्रवातः पश्चार्धे दिनकरकरापातसमये। तदा सस्योपेता प्रवरन्टवराबद्धसमरा धरा स्थाने स्थानेष्वविरतवसामांसरुधिरा ॥ आषाढीपर्वकाले यदि किरणपतेरस्तकालोपपत्तौ वायव्यो वृद्धवेगः प्लवति घनरिपुः पन्नगादानुकारी। जानीयाद्वारिधाराप्रमुदितमुदितां मुक्तमण्डूककण्ठां सस्योद्भासैकचिह्नां सुखबहुलतया भाग्यसेनामिवोर्वीम् ॥ मेरुग्रस्तमरीचिमण्डलतले ग्रीष्मावसाने रवौ वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा चौत्तरः। विद्युद्भ्रान्तिसमस्तकान्तिकलनामत्तास्तदा तोयदा उन्मत्ता इव नष्टचन्द्रकिरणां गां पूरयन्त्यम्बुभिः ॥ ऐशानो यदि शीतलोऽमरगणैः संसेव्यमानो भवेत् पुन्नागागुरुपारिजातसुरभिर्वायुः प्रचण्डध्वनिः। आपूर्णोदकयौवना वसुमती सम्पन्नसस्याकुला धर्म्मिष्ठाः प्रणतारयो नृपतयो रक्षन्ति वर्णांस्तदा" इति वृहत्संहितायाम् ॥ अथ वैद्यकोक्ता दिग्भववायुगुणाः। "प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः। वेरस्य गौरवौष्ण्यानि करोत्यप्स्वोषधीषु च ॥ भग्नोत्पिष्टक्षताद्येषु रागश्वयथुदाहकृत्। सन्नि-